ॐ ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रैं गैं कवचाय हुं । कवचशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रः गः अस्त्राय फट् । अस्त्रशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः ।

*तत् समीपे*

ॐ श्रीं ह्रीं गं महामायायै नमः । महामाया श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं मालिन्यै नमः । मालिनी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं वसुमालिन्यै नमः । वसुमालिनी श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं मोहिन्यै नमः । मोहिनी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं भोगिन्यै नमः । भोगिनी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं विद्यायै नमः । विद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं एताः तृतीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

अनेन तृतीयावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## तुरीयावरणम् (अष्टदलमूले) –

ॐ श्रीं ह्रीं गं वक्रतुण्डाय नमः । वक्रतुण्ड श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं एकदंष्ट्राय नमः । एकदंष्ट्र श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं महोदराय नमः । महोदर श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं लम्बोदराय नमः । लम्बोदर श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं गजवक्त्राय नमः । गजवक्त्र श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं विकटाय नमः । विकट श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं विघ्नराजाय नमः । विघ्नराज श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं धूम्रवर्णाय नमः । धूम्रवर्ण श्रीपादुकां पूजयामि तर्पयामि नमः ।

*दलाग्रे –*

ॐ श्रीं ह्रीं गं अनङ्गकुसुमायै नमः । अनङ्गकुसुमा श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अनङ्गमेखलायै नमः । अनङ्गमेखला श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अनङ्गमदनायै नमः । अनङ्गमदना श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अनङ्गमदनातुरायै नमः । अनङ्गमदनातुरा श्रीपादुकां पूजयामि तर्पयामि नमः
ॐ श्रीं ह्रीं गं अनङ्गरेखायै नमः । अनङ्गरेखा श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं अनङ्गवेगिन्यै नमः । अनङ्गवेगिनी श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अनङ्गाङ्कुशायै नमः । अनङ्गाङ्कुशा श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अनङ्गमालिन्यै नमः । अनङ्गमालिनी श्रीपादुकां पूजयामि तर्पयामि नमः।

ओं एताः तुरीयावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं तुरीयावरणार्चनम् ॥

अनेन तुरीयावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## पञ्चमावरणं (अष्टदले) -

ॐ श्रीं ह्रीं गं अं असिताङ्गभैरवाय नमः । असिताङ्गभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं इं रुरुभैरवाय नमः । रुरुभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं उं चण्डभैरवाय नमः । चण्डभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ॠं क्रोधभैरवाय नमः । क्रोधभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ऌं उन्मत्तभैरवाय नमः । उन्मत्तभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं एं कापालभैरवाय नमः । कापालभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ओं भीषणभैरवाय नमः । भीषणभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं अं संहारभैरवाय नमः । संहारभैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं आं ब्राह्म्यै नमः । ब्राह्मी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ईं माहेश्वर्यै नमः । माहेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ऊं कौमार्यै नमः । कौमारी श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं ॠं वैष्णव्यै नमः । वैष्णवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ॡं वाराह्यै नमः । वाराही श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ऐं इन्द्राण्यै नमः । इन्द्राणी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं औं चामुण्डायै नमः । चामुण्डा श्रीपादुकां पूजयामि तर्पयामि नमः।
ॐ श्रीं ह्रीं गं अः महालक्ष्म्यै नमः । महालक्ष्मी श्रीपादुकां पूजयामि तर्पयामि नमः।

ओं एताः पञ्चमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

अनेन पञ्चमावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

**षष्ठावरणम् (षोडशदले) –**

ॐ श्रीं ह्रीं गं सिद्धविद्यागणेशाय नमः । सिद्धविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं वीरविद्यागणेशाय नमः । वीरविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं भोगविद्यागणेशाय नमः । भोगविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं योगविद्यागणेशाय नमः । योगविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं वटुविद्यागणेशाय नमः । वटुविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं रतिविद्यागणेशाय नमः । रतिविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं बालविद्यागणेशाय नमः । बालविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं लीलाविद्यागणेशाय नमः । लीलाविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं रूपविद्यागणेशाय नमः । रूपविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं कान्तिविद्यागणेशाय नमः । कान्तिविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं योगविद्यागणेशाय नमः । योगविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं मायाविद्यागणेशाय नमः । मायाविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं मोहविद्यागणेशाय नमः । मोहविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं श्रद्धाविद्यागणेशाय नमः । श्रद्धाविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं मेधविद्यागणेशाय नमः । मेधाविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं सर्वविद्यागणेशाय नमः । सर्वविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं मोक्षसारविद्यागणेशाय नमः । मोक्षसारविद्यागणेश श्रीपादुकां पूजयामि तर्पयामि नमः ।

*षोडश तिथिनित्या (तत् समीपे) -*

ॐ श्रीं ह्रीं गं अं ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं । कामेश्वरी नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं आं ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगिनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हे ब्लूं हे क्लिन्ने सर्वाणि भगाने वशमानय स्त्रीं हर ब्लें ह्रीं आं । भगमालिनी नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं इं ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इं । नित्यक्लिन्ना नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ईं ॐ क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा ईं । भेरुण्डा नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि  नमः ।
ॐ श्रीं ह्रीं गं उं ॐ ह्रीं वह्निवासिन्यै नमः उं । वह्निवासिनी नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि  नमः ।
ॐ श्रीं ह्रीं गं ऊं ह्रीं क्लिन्नॆ ऐं क्रों नित्यमदद्रवे ह्रीं ऊं । महावज्रेश्वरी नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि  नमः ।

ॐ श्रीं ह्रीं गं ॠं ह्रीं शिवदूत्यै नमः ॠं । शिवदूति नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ॠं ॐ ह्रीं हुं ख च छे क्षः स्त्रीं हुं क्षे ह्रीं फट् ॠं । त्वरिता नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ऌं ऐं क्लीं सौः ऌं । कुलसुन्दरी नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ॡं ह्स्क्ल्ड्रैं ह्स्क्ल्ड्रीं ह्स्क्ल्ड्रौः ॡं । नित्या नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं एं ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं एं । नीलपताका नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ऐं भ्म्र्यूं ऐं । विजया नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ॐ स्वौं ॐ । सर्वमङ्गला नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं औं ॐ नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं रररररर हूं फट् स्वाहा औं । ज्वालामालिनि नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं अं च्क्लौं अं । चित्रा नित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं अः कएईलह्रीं हसकहलह्रीं सकलह्रीं अः । श्रीललिता महानित्यादेवी श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं एताः षष्ठावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम् ॥

अनेन षष्ठावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## सप्तमावरणम् (भूपुरस्य अन्तः) -

ॐ श्रीं ह्रीं गं अणिमासिद्ध्यै नमः । अणिमासिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं महिमासिद्ध्यै नमः । महिमासिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं गरिमासिद्ध्यै नमः । गरिमासिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं लघिमासिद्ध्यै नमः । लघिमासिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ईशित्वसिद्ध्यै नमः । ईशित्वसिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं वशित्वसिद्ध्यै नमः । वशित्वसिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं प्राप्तिसिद्ध्यै नमः । प्राप्तिसिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं प्राकाम्यसिद्ध्यै नमः । प्राकाम्यसिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं एताः सप्तमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।

भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

अनेन सप्तमावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## अष्टमावरणम् (भूपुरस्य बाह्ये) -

ओं श्रीं ह्रीं गं बीजापूराय नमः । बीजापूर श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं गदायै नमः । गदा श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं इक्षुकार्मुकाय नमः । इक्षुकार्मुक श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं त्रिशूलाय नमः । त्रिशूल श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं चक्राय नमः । चक्र श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं अब्जाय नमः । अब्ज श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं पाशाय नमः । पाश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं उत्पलाय नमः । उत्पल श्रीपादुकां पूजयामि तर्पयामि नमः ।
ओं श्रीं ह्रीं गं व्रीह्यग्राय नमः । व्रीह्यग्र श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं श्रीं ह्रीं गं स्वदन्ताय नमः । स्वदन्त श्रीपादुकां पूजयामि तर्पयामि नमः । (वामहस्ते)
ओं श्रीं ह्रीं गं रत्नकलशाय नमः । रत्नकलश श्रीपादुकां पूजयामि तर्पयामि नमः । (दक्षहस्ते)

ओं एताः अष्टमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम् ॥

अनेन अष्टमावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## नवमावरणं (भूपुराग्रे) -

ॐ श्रीं ह्रीं गं इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावत वाहनाय सपरिवाराय नमः । इन्द्र श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं रं अग्नये शक्तिहस्ताय तेजोऽधिपतये अज वाहनाय सपरिवाराय नमः । अग्नि श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं टं यमाय दण्डहस्ताय प्रेताधिपतये महिष वाहनाय सपरिवाराय नमः । यम श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं क्षं निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नर वाहनाय सपरिवाराय नमः । निर्ऋति श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं वं वरुणाय पाशहस्ताय जलाधिपतये मकर वाहनाय सपरिवाराय नमः । वरुण श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं यं वायवे ध्वजहस्ताय प्राणाधिपतये रुरु वाहनाय सपरिवाराय नमः । वायु श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं सं सोमाय शङ्खहस्ताय नक्षत्राधिपतये अश्व वाहनाय सपरिवाराय नमः । सोम श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं हं ईशानाय त्रिशूलहस्ताय विद्याधिपतये वृषभ वाहनाय सपरिवाराय नमः । ईशान श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं आं ब्रह्मणे पद्महस्ताय लोकाधिपतये हंस वाहनाय सपरिवाराय नमः । ब्रह्म श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ह्रीं विष्णवे चक्रहस्ताय नागाधिपतये गरुड वाहनाय सपरिवाराय नमः । विष्णु श्रीपादुकां पूजयामि तर्पयामि नमः ।

ॐ श्रीं ह्रीं गं वं वज्राय नमः । वज्र श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं शं शक्तये नमः । शक्ति श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं दं दण्डाय नमः । दण्ड श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं खं खड्गाय नमः । खड्ग श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं पं पाशाय नमः । पाश श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं ध्वं ध्वजाय नमः । ध्वज श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं गं गदायै नमः । गदा श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं त्रिं त्रिशूलाय नमः । त्रिशूल श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं पं पद्माय नमः । पद्म श्रीपादुकां पूजयामि तर्पयामि नमः ।
ॐ श्रीं ह्रीं गं चं चक्राय नमः । चक्र श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं एताः नवमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा ॥ श्री श्रीविद्यागणपति श्रीपादुकां पूजयामि तर्पयामि नमः । (3 वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥

अनेन नवमावरणार्चनेन भगवान् सर्वदेवात्मक श्री श्रीविद्यागणपति प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

**पञ्चपूजा -**

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।
हं आकाशात्मिकायै पुष्पाणि कल्पयामि ।
यं वाय्वात्मिकायै धूपं कल्पयामि ।
रं अग्न्यात्मिकायै दीपं कल्पयामि ।
वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मिकायै समस्तोपचार पूजान् कल्पयामि ।

# ॥ श्री श्रीविद्यागणेश अष्टोत्तरशतनाम स्तोत्रम् ॥

श्रीमद्विद्यागणेशस्य नाम्नामष्टोत्तरं शतम् ।
वक्ष्यामि शृणु देवेशि सावधानेन चेतसा ॥१॥
सर्वपापप्रशमनं सर्वविघ्ननिवारकम् ।
सर्वरोगहरं दिव्यं साधकाभीष्टदायकम् ॥२॥
ब्रह्मादयः सुराः सर्वे वसिष्ठाद्या मुनीश्वराः ।
विद्यागणाधिनाथस्य चक्राराधनतत्पराः ॥३॥
स्तोत्रेणानेन सम्पूज्य जप्त्वा स्वे स्वे पदे स्थिताः ।
सुखिनोऽद्यापि दृश्यन्ते सद्यः सन्तुष्टमानसाः ॥४॥
तादृशं परमं दिव्यं प्रत्यक्षफलदायकम् ।
यः पठेत् प्रातरुत्थाय चिन्तयेन्मूर्ध्नि बालकम् ॥५॥
स सर्वदुरितान्मु(त्त्वा)क्तो सर्वान् कामानवाप्नुयात् ।
चक्रपूजाविधानेन प्रयाणे समुपस्थिते ॥६॥
शोभनेषु समस्तेषु कार्येष्वन्येषु बुद्धिमान् ।
स्तोत्रेणानेन सम्पूज्य जप्त्वाभीष्टमवाप्नुयात् ॥७॥
धान्यकामी लभेद्धान्यं धनकामी धनं लभेत् ।
सन्तानकामी सन्तानं क्षेत्रार्थी क्षेत्रमुत्तमम् ॥८॥
सर्वं लभेत् सर्वकामी निष्कामी तत्फलं लभेत् ।
ॐ विद्यागणपतिर्विघ्नहरो गजमुखोऽव्ययः ॥९॥
विज्ञानात्मा वियत्कायो विश्वाकारो विनायकः ।
विश्वसृग्विश्वभुग्विश्वसंहर्ता विश्वगोपनः ॥१०॥
विश्वानुग्राहकः सत्यः शिवतुल्यः शिवात्मजः ।
विचित्रनर्तनो वीरो विश्वसन्तोषवर्धनः ॥११॥

विमर्शी विमलाचारो विश्वाधारो विधारणः ।
स्वतन्त्रः सुलभः स्वर्चः सुमुखः सुखबोधकः ॥१२॥
सूर्याग्निशशिदृक् सोमकलाचूडः सुखासनः ।
स्वप्रकाशः सुधावक्त्रः स्वयंव्यक्तः स्मृतिप्रियः ॥१३॥
शक्तीशः शङ्करः शम्भुः प्रभुर्विभुरुमासुतः ।
शान्तः शतमखाराध्यश्चतुरश्चक्रनायकः ॥१४॥
कालजित् करुणामूर्तिरव्यक्तः शाश्वतः शुभः ।
उग्रकर्मोदितानन्दी शिवभक्तः शिवान्तरः ॥१५॥
चैतन्यधृतिरव्यग्रः सर्वज्ञः सर्वशत्रुभृत् ।
सर्वाग्रः समरानन्दी संसिद्धगणनायकः ॥१६॥
साम्बप्रमोदको वज्री मानसो मोदकप्रियः ।
एकदन्तो बृहत्कुक्षिः दीर्घतुण्डो विकर्णकः ॥१७॥
ब्रह्माण्डकन्दुकश्चित्रवर्णश्चित्ररथासनः ।
तेजस्वी तीक्ष्णधिषणः शक्तिबृन्दनिषेवितः ॥१८॥
परापराश्च पश्यन्ती प्राणनाथः प्रमत्तहृत् ।
संक्लिष्टमध्यमःस्पष्टो वैखरीजनकः शुचिः ॥१९॥
धर्मप्रवर्तकः कामो भूमिस्फुरितविग्रहः ।
तपस्वी तरुणोल्लासी योगिनीभोगतत्परः ॥२०॥
जितेन्द्रियो जयश्रीको जन्ममृत्युविदारणः ।
जगद्गुरुरमेयात्मा जङ्गमस्थावरात्मकः ॥२१॥
नमस्कारप्रियो नानामतभेदविभेदकः ।
नयवित् समदृक् शूरः सर्वलोकैकशासनः ॥२२॥
विशुद्धविक्रमो वृद्धः संवृद्धः ससुहृद्गणः ।
सर्वसाक्षी सदानन्दी सर्वलोकप्रियङ्करः ॥२३॥

सर्वातीतः समरसः सत्यावासः सतां गतिः ।
इति विद्यागणेशस्य नाम्नामष्टोत्तरं शतम् ॥२४॥
यः पठेच्छृणुयाद्वापि नित्यं भक्तिसमन्वितः ।
तस्य साधकवर्यस्य सर्वावस्थासु सर्वदा ।
नासाध्यमस्ति किमपि विद्याविघ्नेश्वरात्मजः ॥२५॥

॥ इति महाशैवतन्त्रे आकाशभैरवकल्पे शङ्करविरचिते श्रीविद्यागणेशाष्टोत्तरशतनाम स्तोत्रं सम्पूर्णम् ॥

## ॥ श्री श्रीविद्यागणेश अष्टोत्तरशत नामावलिः ॥

ॐ विद्यागणपतये नमः ।
ॐ विघ्नहराय नमः ।
ॐ गजमुखाय नमः ।
ॐ अव्ययाय नमः ।
ॐ विज्ञानात्मने नमः ।
ॐ वियत्कायाय नमः ।
ॐ विश्वाकाराय नमः ।
ॐ विनायकाय नमः ।
ॐ विश्वसृजे नमः ।
ॐ विश्वभुजे नमः । (10)
ॐ विश्वसंहर्त्रे नमः ।
ॐ विश्वगोपनाय नमः ।
ॐ विश्वानुग्राहकाय नमः ।
ॐ सत्याय नमः ।
ॐ शिवतुल्याय नमः ।
ॐ शिवात्मजाय नमः ।
ॐ विचित्रनर्तनाय नमः ।
ॐ वीराय नमः ।
ॐ विश्वसन्तोषवर्धनाय नमः ।
ॐ विमर्शिने नमः । (20)
ॐ विमलाचाराय नमः ।
ॐ विश्वाधाराय नमः ।
ॐ विधारणाय नमः ।
ॐ स्वतन्त्राय नमः ।
ॐ सुलभाय नमः ।
ॐ स्वर्चाय नमः ।
ॐ सुमुखाय नमः ।
ॐ सुखबोधकाय नमः ।
ॐ सूर्याग्निशशिदृशे नमः ।
ॐ सोमकलाचूडाय नमः । (30)
ॐ सुखासनाय नमः ।
ॐ स्वप्रकाशाय नमः ।
ॐ सुधावक्राय नमः ।
ॐ स्वयंव्यक्ताय नमः ।
ॐ स्मृतिप्रियाय नमः ।
ॐ शक्तीशाय नमः ।
ॐ शङ्कराय नमः ।
ॐ शम्भवे नमः ।
ॐ प्रभवे नमः ।
ॐ विभवे नमः । (40)
ॐ उमासुताय नमः ।
ॐ शान्ताय नमः ।
ॐ शतमखाराध्याय नमः ।
ॐ चतुराय नमः ।

ॐ चक्रनायकाय नमः ।
ॐ कालजिते नमः ।
ॐ करुणामूर्तये नमः ।
ॐ अव्यक्ताय नमः ।
ॐ शाश्वताय नमः ।
ॐ शुभाय नमः । (50)
ॐ उग्रकर्मणे नमः ।
ॐ उदितानन्दिने नमः ।
ॐ शिवभक्ताय नमः ।
ॐ शिवान्तराय नमः ।
ॐ चैतन्यधृतये नमः ।
ॐ अव्यग्राय नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ सर्वशत्रुभृते नमः ।
ॐ सर्वाग्राय नमः ।
ॐ समरानन्दिने नमः । (60)
ॐ संसिद्धगणनायकाय नमः ।
ॐ साम्बप्रमोदकाय नमः ।
ॐ वज्रिणे नमः ।
ॐ मानसो मोदकप्रियाय नमः ।
ॐ एकदन्ताय नमः ।
ॐ बृहत्कुक्षये नमः ।
ॐ दीर्घतुण्डाय नमः ।
ॐ विकर्णकाय नमः ।
ॐ ब्रह्माण्डकन्दुकाय नमः ।
ॐ चित्रवर्णाय नमः । (70)
ॐ चित्ररथासनाय नमः ।
ॐ तेजस्विने नमः ।
ॐ तीक्ष्णधिषणाय नमः ।
ॐ शक्तिबृन्दनिषेविताय नमः ।
ॐ परापरोत्थपश्यन्तिप्राणनाथाय नमः
ॐ प्रमत्तहृते नमः ।
ॐ सङ्क्लिष्टमध्यमस्पष्टाय नमः ।
ॐ वैखरीजनकाय नमः ।
ॐ शुचये नमः ।
ॐ धर्मप्रवर्तकाय नमः । (80)
ॐ कामाय नमः ।
ॐ भूमिस्फुरितविग्रहाय नमः ।
ॐ तपस्विने नमः ।
ॐ तरुणोल्लासिने नमः ।
ॐ योगिनीभोगतत्पराय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ जयश्रीकाय नमः ।
ॐ जन्ममृत्युविदारणाय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ अमेयात्मने नमः । (90)
ॐ जङ्गमस्थावरात्मकाय नमः ।
ॐ नमस्कारप्रियाय नमः ।

ॐ नानामतभेदविभेदकाय नमः ।
ॐ नयविदे नमः ।
ॐ समदृशे नमः ।
ॐ शूराय नमः ।
ॐ सर्वलोकैकशासनाय नमः ।
ॐ विशुद्धविक्रमाय नमः ।
ॐ वृद्धाय नमः ।
ॐ संवृद्धाय नमः । (100)

ॐ ससुहृद्गणाय नमः ।
ॐ सर्वसाक्षिणे नमः ।
ॐ सदानन्दिने नमः ।
ॐ सर्वलोकप्रियङ्कराय नमः ।
ॐ सर्वातीताय नमः ।
ॐ समरसाय नमः ।
ॐ सत्यावासाय नमः ।
ॐ सतां गतये नमः । (108)

॥ इति श्रीविद्यागणेशाष्टोत्तरशत नामावलिः सम्पूर्णम् ॥


SUBASH CB நாகை.பா.சுபாஷ ©

## ॥ श्री देवी दिव्यवैभवाश्चर्याष्टोत्तरशतनाम स्तोत्रम् ॥

पार्वत्युवाच –

सर्वज्ञ करुणासिन्धो सर्वभूतमहेश्वर ।

करुणाकर गम्भीरकटाक्ष-पदवीं सकृत् ॥1॥

मयि प्रेरय मन्नाथ मन्दहास प्रभासिताम् ।

लभ्यते वर्णराड् व्यक्तं तव सौमुख्य-सुन्दरम् ॥2॥

वर्तते हृदि किञ्चिन्मे ज्ञातव्यं चिरसंभृतम् ।

कीदृशी वा तव कृपा चापलं मम हास्यदम् ॥3॥

भुक्तिमुक्त्याश्रयं नित्यं साधकं त्वद्वचोऽमृतम् ।

इच्छा ममैव महती सर्वसारातिलङ्घिनी ॥4॥

ध्यानं स्तुतिं जपं कर्म विना सर्वार्थसिद्धिदम् ।

उपायं वद मे शम्भो दीनलोकोपकारकम् ॥5॥

असूयाक्रान्त-मनसस्त्वन्माहात्म्यैक-लोलुपाः ।

दुर्जनाः सज्जनादीनां मूर्खाणां च कदाचन ॥6॥

सुतत्वमुपदेष्टुं वा दातुं वा वाञ्छितं फलम् ।

भयं वारयितुं वापि न समर्था न तत्पराः ॥7॥

तस्माद्दीनोपकाराय स्वल्पायासं महाफलम् ।

उपायं वद मन्नाथ सर्वजीव-दयापर ॥8॥

ईश्वर उवाच –

देवि तुष्टोऽस्मि भद्रं ते दीनावनधुरन्धरे ।
साधु पृष्टं महाभागे साधयिष्यामि ते प्रियम् ॥9॥
विनाऽयासं फलं नास्ति स्वल्पायासं तु दुर्लभम् ।
साधनं दुर्लभं लोके कर्तव्यं च तव प्रियम् ॥10॥
अस्ति गुह्यतमं किञ्चिच्चिन्तेयं त्यजतां त्वया ।
त्वदीय-वैभवाश्चर्य-नाम्नामष्टोत्तरं शतम् ॥11॥
आश्चर्यनामाष्टशतं ब्रह्मविष्ण्वादि दुर्लभम् ।
दक्षिणामूर्तिरूपेण ध्याननिष्ठे पुरा मयि ॥12॥
उपदिष्टं त्वया देवि मया सम्यग्धृतं हि तत् ।
तत्फलं च तदेतन्मे मत्प्रियासि परायणि ॥13॥
वामनाय मया प्रोक्तं बलिवञ्चनकामिने ।
तथा परशुरामाय जगद्विजयकामिने ॥14॥
सीतावियोगखिन्नाय रामायरिपदार्थिने ।
षोडशस्त्री-सहस्रेच्छा-प्रधानोद्युक्त-चेतसे ॥15॥
कृष्णाय वेदव्यासाय वेदव्यसनकामिने ।
सुभद्रासक्तचित्ताय पार्थायरिविजिष्णवे ॥16॥
अद्यापि सिद्धिकामेभ्यो महर्षिभ्यश्च बोधितम् ।
तदेतदद्भुजं गोप्यं न मृषा शिवभाषणम् ॥17॥
तव स्नेहात्प्रवक्ष्यामि त्वत्प्रियं मम च प्रियम् ।

नामाष्टशतकस्यास्य ऋषिश्चानन्दभैरवः ॥18 ॥
छन्दोऽनुष्टुप् तथा देवी देवतानन्दभैरवी ।
मूलखण्डैस्त्रिभिः प्रोक्तं बीजशक्त्यादिकं तथा ॥19 ॥
मूलाङ्गैरङ्गक्लृप्तिः स्यात् तथा शेषन्तु मूलवत् ।

अस्य श्री देवी-दिव्यवैभवाश्चर्याष्टोत्तरशतनाम-स्तोत्र-महामन्त्रस्य आनन्दभैरव ऋषिः (शिरसि) । अनुष्टुप् छन्दः (मुखे) । आनन्दभैरवी श्रीमहात्रिपुरसुन्दरी देवता (हृदि) ।

ऐं कएईलह्रीं बीजं (गुह्ये) । सौः सकलह्रीं शक्तिः (पादयोः) । क्लीं हसकहलह्रीं कीलकं (नाभौ) । मम आनन्दभैरवी श्रीमहात्रिपुरसुन्दरी प्रसाद(सान्निध्य)सिद्ध्यर्थे जपे विनियोगः (सर्वाङ्गे) ॥

**करन्यासः –**

ऐं कएईलह्रीं अङ्गुष्ठाभ्यां नमः ।
क्लीं हसकहलह्रीं तर्जनीभ्यां नमः ।
सौः सकलह्रीं मध्यमाभ्यां नमः ।
ऐं कएईलह्रीं अनामिकाभ्यां नमः ।
क्लीं हसकहलह्रीं कनिष्ठिकाभ्यां नमः ।
सौः सकलह्रीं करतलकरपृष्ठाभ्यां नमः ।

**अङ्गन्यासः -**

ऐं कएईलह्रीं हृदयाय नमः ।

क्लीं हसकहलह्रीं शिरसे स्वाहा ।

सौः सकलह्रीं शिखायै वषट् ।

ऐं कएईलह्रीं कवचाय हुं ।

क्लीं हसकहलह्रीं नेत्रत्रयाय वौषट् ।

सौः सकलह्रीं अस्त्राय फट् ।

भूर्भुवस्सुवरों इति दिग्बन्धः ॥

अथ ध्यानं प्रवक्ष्यामि तत्तद्वाञ्छित-सिद्धये ॥20॥

प्रसादाय महादेव्याः समाहितमनाः श्रृणु ।

ध्यायेदपार-गम्भीरममृताम्भोधिमद्भुतम् ॥21॥

कल्लोल-जाल-विक्रीड-प्रोच्चलद्वर्ण-दुर्गमम् ।

चतुरश्र-मणिद्वीपं सुरद्रुम-महोज्ज्वलम् ॥22॥

तन्मध्ये तत्र रङ्गालि शोभितां तामनुस्मरेत् ।

प्राकार-गोपुराश्चर्य-तोरणश्री-विराजिताम् ॥23॥

भूप्रस्थार-महाचक्ररूपां तत्र स्मरेत् पुरीम् ।

तत्पुर्यां तु यथास्थाने महामेरुं विचिन्तयेत् ॥24॥

तत्राऽपि पूर्ववत्-ध्यायेत् सर्वावरणदेवताः ।

तन्मध्ये बैन्दवस्थाने महामेरुं विचिन्तयेत् ॥25॥

तत्राऽपि पूर्ववत्-ध्यायेत् सर्वावरणदेवताः ।

तद्बिन्दौ सुन्दरं ध्यायेत्-दिव्यमाणिक्य-मण्डपम् ॥26॥

अर्धमेर्वात्मकं तत्र रत्नसिंहासनं स्मरेत् ।

रत्नपर्यङ्कमाश्चर्यं पञ्चब्रह्ममयं स्मरेत् ॥27॥

आमोद-बन्धुराश्चर्याम्लान-पुष्प-सुमालिकाम् ।

तद्बिन्दौ विपुलं ध्यायेत् तत्र विद्यासनं महत् ॥28॥

तत्र पद्मासनासीन कामेशाङ्क निवासिनीम् ।

विद्रवच्चन्द्र-कलिका-स्थान विज्ञाननन्दिताम् ॥29॥

अतित्वर-द्दढाश्लिष्ट तत्पुरो-भाग-सङ्गताम् ।

स्वाधाराह्वि-षद्चक्रमध्यभाग विराजितम् ॥30॥

यथोचित-शिवोन्नीत-वेणीचुबुक-मोहिताम् ।

कामतन्त्र-रहस्यज्ञां ज्ञानानुगुण-चेष्ठिताम् ॥31॥

कर्मसिद्धैः सदा ध्येयां मानसोल्लास सुन्दरीम् ।

निजपादाम्बुज-ध्यान-तत्पराभीष्ट-सिद्धिदाम् ॥32॥

ब्रह्म-विष्णवादिभिर्ध्येयां महावीर-समर्चिताम् ।

सिद्धसङ्घैः नतपदां योगिनी-गणसेविताम् ॥33॥

मुक्तोपगीत-चरितां प्राकृत-प्राणिदूरगाम् ।

प्रतिक्षण-मणि-स्वर्णवर्ष-कल्पद्रु-मूलकाम् ॥34॥

चक्रलम्बि-महारत्न-मालाचुम्बित-मौलिकाम् ।

चामरान्दोलनोत्पन्न-वाताङ्कुर-हृतश्रमाम् ॥35॥

गणेश-स्कन्ध-शास्तादि-बाललान-हर्षिताम् ।

दासीकुल-समुन्नीतैरूपचारैः प्रसादिताम् ॥36॥

मेरुमन्दर-सौधान्तरावास-सुखगर्विताम् ।

श्रीवीर-कटकोद्भासि वामपाद-प्रसरिणीम् ॥37॥

वामोरुन्यस्त-मञ्जीर-लसद्दक्ष-पदाम्बुजाम् ।

मेरुचक्रात्मिकानर्घ्य-माणिक्य-मकुटोज्ज्वलाम् ॥38॥

कोटीरकोटीयुक्चन्द्र-कलामय-कलोज्ज्वलाम् ।

पाशाङ्कुशेक्षुकोदण्ड-पञ्चबाणल-सत्कराम् ॥39॥

मञ्जु-रोम-लता-नाभि-वलि-संमोहिताखिलाम् ।

मध्यमेन महारम्य-प्रकटोग्र-कटीतटाम् ॥40॥

अच्छ-वस्त्रान्तरोद्दीप्य-ज्जघनातिरहस्यकाम् ।

नमोरुजानु-जङ्घान्तां वीराधीन-महेश्वराम् ॥41॥

प्रतिक्षणोन्मिषद्बिन्दु-कण्टूतिस्मर-मन्दिराम् ।

बिन्दूदयैककालेन बहिर्भावस्वलिङ्गिनीम् ॥42॥

लिङ्गोदयैककालेन सीत्कारविशदस्मिताम् ।

स्वर्गापवर्गदपदां महाभयनिवारिणीम् ॥43॥

सर्वावयवसौन्दर्यां सौभाग्यहृदयङ्गमाम् ।

त्रैलोक्यमोहनाकार वशीकृतचराचराम् ॥44॥

भाग्यवन्-मानसावास-लालनां-मदलालनाम् ।

भुक्तिमुक्तिप्रसादेन भक्तचित्तप्रसादिनीम् ॥45॥

भक्ताभिलाषानुगुणवेषाद्भुततराकृतिम् ।

मुख्याभरण-रम्याङ्गि-मङ्गरागस्रगुज्ज्वलाम् ॥46॥

पारिजातमिलद्गन्ध-हरिद्रा-कुङ्कुमोल्बणाम् ।

ताम्बूलपूरितमुखीं कज्जलानीललोचनाम् ॥47॥

सर्वस्यातिशयामेकां देवताजीवनायिकाम् ।

मन्दहास-मुखालोक-संमानित-सदाशिवाम् ॥48॥

सौमङ्गल्य-महासूत्र-माहात्म्यास्थिर-शङ्कराम् ।

मकार-पञ्चक-व्यक्त-परमानन्द-तुन्दिलाम् ॥49॥

जननीं जगदाराध्यां राजराजेश्वरेश्वरीम् ।

सर्वेश्वरीं सदानन्दां सर्वाधिष्ठानरूपिणीम् ॥50॥

ज्योतिःस्वरूपां चिद्रूपां सर्ववेदान्तपारगाम् ॥

ब्रह्मविष्ण्वादि-देवानामपि दुर्गमवैभवाम् ॥51॥

एवं ध्यात्वा महादेवीमुपचारान्-प्रकल्पयेत् ।

जपेदनन्यमनसा नाम्नामष्टोत्तरं शतम् ॥52॥

**पञ्चपूजा -**

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।

हं आकाशात्मिकायै पुष्पं कल्पयामि ।

यं वाय्वात्मिकायै धूपं कल्पयामि ।

रं अग्न्यात्मिकायै दीपं कल्पयामि ।

वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पयामि ।

सं सर्वात्मिकायै ताम्बूलादि सर्वोपचारान् कल्पयामि ॥

ओं ऐं ह्रीं श्रीं परमानन्दलहरी परचैतन्य-दीपिका ।
स्वयंप्रकाश-किरणा नित्यवैभव-शालिनी ॥53॥
विशुद्ध-केवला-खण्ड-सत्यकालात्म-रूपिणी ।
आदिमध्यान्त-रहिता महामाया-विलासिनी ॥54॥
गुणत्रय-परिच्छेत्री सर्वतत्त्व-प्रकाशिनी ।
स्त्रीपुंसभाव-रसिका जगत्सर्गादि-लंपटा ॥55॥
अशेष-नामरूपादि-भेदच्छेद-रविप्रभा ।
अनादिवासनारूपा वासनोद्यत्प्रपञ्चिका ॥56॥
प्रपञ्चोपशमप्रौढा चराचर-जगन्मयी ।
समस्त-जगदाधारा सर्वसञ्जीवनोत्सुका ॥57॥
भक्तचेतोमयानन्त-स्वार्थवैभव-विभ्रमा ।
सर्वाकर्षण-वश्यादि-सर्वकर्म-दुरन्धरा ॥58॥
विज्ञान-परमानन्दविद्या सन्तान-सिद्धिदा ।
आयुरारोग्य-सौभाग्य-बल-श्रीकीर्तिभाग्यदा ॥59॥
धन-धान्य-मणी-वस्त्र-भूषालेपन-माल्यदा ।
गृह-ग्राम-महाराज्य-साम्राज्य-सुखदायिनी ॥60॥

सप्ताङ्गशक्ति-सम्पूर्ण-सार्वभौम-फलप्रदा ।
ब्रह्म-विष्णु-शिवेन्द्रादि-पदविश्राणनक्षमा ॥61॥
भुक्ति-मुक्ति-महाभक्ति-विरक्त्य-द्वैतदायिनी ।
निग्रहानुग्रहाध्यक्षा ज्ञाननिर्णेयदायिनी ॥62॥
परकायप्रवेशादि-योगसिद्धि-प्रदायिनी ।
शिष्टसञ्जीवनप्रौढा दुष्टसंहार-सिद्धिदा ॥63॥
लीला-विनिर्मितानेककोटि-ब्रह्माण्ड-मण्डला ।
एकानेकात्मिका नानारूपिण्यर्धाङ्गनेश्वरी ॥64॥
शिवशक्तिमयी नित्यशृङ्गारैक-रसप्रिया ।
तुष्टा पुष्टापरिच्छिन्ना नित्ययौवन-मोहिनी ॥65॥
समस्तदेवतारूपा सर्वदेवादिदेवता ।
देवर्षि-पितृ-सिद्धादि-योगिनी-भैरवात्मिका ॥66॥
निधि-सिद्धि-मणी-मुद्रा शस्त्रास्त्रायुध-भासुरा ।
छत्र-चामरवादित्र-पताका-व्यजनाञ्चिता ॥67॥
हस्त्याश्वरथ-पादातामात्यसेना-सुसेविता ।
पुरोहित-कुलाचार्य-गुरुशिष्यादि-सेविता ॥68॥
सुधा-समुद्र-मध्योद्यत्सुरद्रुम-निवासिनी ।
मणिद्वीपान्तर-प्रोद्यत्-कदंबवन-वासिनी ॥69॥
चिन्तामणि-गृहान्तस्था मणिमण्डप-मध्यगा ।
रत्नसिंहासन-प्रोद्य-च्छिवमञ्चाधि-शायिनी ॥70॥

सदाशिव-महालिङ्ग-मूलसङ्घट्ट-योनिका ।
अन्योन्यालिङ्ग-सङ्घर्ष-कण्डूसंक्षुब्ध-मानसा ॥71॥
कलोद्यद्बिन्दुकालिन्या-तुर्यनाद-परंपरा ।
नादान्तानन्द-सन्दोह-स्वयंव्यक्त-वचोऽमृता ॥72॥
कामराज-महातन्त्र-रहस्याचार-दक्षिणा ।
मकार-पञ्चकोद्भूत-प्रौढा-सोल्लास-सुन्दरी ॥73॥
श्रीचक्रराजनिलया श्रीविद्यामन्त्र-विग्रहा ।
अखण्ड-सच्चिदानन्द-शिवशक्त्यैक-रूपिणी ॥74॥
त्रिपुरा त्रिपुरेशानी महात्रिपुरसुन्दरी ।
त्रिपुरावास-रसिका त्रिपुराश्री-स्वरूपिणी ॥75॥
महापद्मवनान्तस्था श्रीमत्-त्रिपुरमालिनी ।
महात्रिपुर-सिद्धाम्बा श्रीमहात्रिपुराम्बिका ॥76॥
नवचक्र-क्रमादेवी महात्रिपुरभैरवी ।
श्रीमाता ललिता बाला राजराजेश्वरी शिवा ॥77॥
उत्पत्ति-स्थिति-संहारक्रम-चक्रनिवासिनी ।
अर्धमेर्वात्म-चक्रस्था सर्वलोकमहेश्वरी ॥78॥
वल्मीकपुर-मध्यस्था जम्बूवन-निवासिनी ।
अरुणाचल-शृङ्गस्था व्याघ्रालय-निवासिनी ॥79॥
श्रीकालहस्ति-निलया काशीपुर-निवासिनी ।
श्रीमत्कैलास-निलया द्वादशान्त-महेश्वरी ॥80॥

श्रीषोडशान्त-मध्यस्था सर्ववेदान्त-लक्षिता ।
श्रुति-स्मृति-पुराणेतिहासागम-कलेश्वरी ॥81॥
भूत-भौतिक-तन्मात्र-देवताप्राण-हृन्मयी ।
जीवेश्वर-ब्रह्मरूपा श्रीगुणाढ्या गुणात्मिका ॥82॥
अवस्थात्रय-निर्मुक्ता वाग्रमोमा-महीमयी ।
गायत्री-भुवनेशानी-दुर्गा-काळ्यादि-रूपिणी ॥83॥
मत्स्य-कूर्म-वराहादि-नानारूप-विलासिनी ।
महायोगीश्वराराध्या महावीर-वरप्रदा ॥84॥
सिद्धेश्वर-कुलाराध्या श्रीमच्चरणवैभवा श्रीं ह्रीं ऐं ओं ।

**अङ्गन्यासः -**

ऐं कएईलह्रीं हृदयाय नमः ।
क्लीं हसकलह्रीं शिरसे स्वाहा ।
सौः सकलह्रीं शिखायै वषट् ।
ऐं कएईलह्रीं कवचाय हुं ।
क्लीं हसकलह्रीं नेत्रत्रयाय वौषट् ।
सौः सकलह्रीं अस्त्राय फट् ।

भूर्भुवस्सुवरों इति दिग्विमोकः ॥

**ध्यानं** – श्लोका सङ्ख्या 20 आरभ्य 52 पर्यन्तं पठित्वा ।

**पञ्चपूजा -**

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।

हं आकाशात्मिकायै पुष्पं कल्पयामि ।

यं वाय्वात्मिकायै धूपं कल्पयामि ।

रं अग्न्यात्मिकायै दीपं कल्पयामि ।

वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पयामि ।

सं सर्वात्मिकायै ताम्बूलादि सर्वोपचारान् कल्पयामि ॥

**फलश्रुतिः –**

एवं नामाष्टशतकमेतद्गोप्यतरं शिवे ॥85॥

नास्तिकम्लेच्छपाषण्ड-बौद्धपञ्चमदुर्गमम् ।

आवयोर्यत्र करुणा तस्यैव सुलभं भुवि ॥86॥

पतिता योग्यसंमूढाः पशुबुद्धिप्रबोधकाः ।

आवयोः शापसंपन्ना व्रजेर्दुर्गतिं ध्रुवम् ॥87॥

इदं नामाष्टशतकमुपदिश्य महेश्वरि ।

उपादिश फलं चास्य समाधावेव सदारम् ॥88॥

श्रीदेव्युवाच –

एतन्नामाष्टशतकं ममानन्दप्रदायकम् ।
योग्यस्त्वमेव विज्ञाने नान्योऽस्ति भुवनत्रये ॥89॥
अपेक्ष्य यां यां सिद्धिं त्वं नामानि स्मर्तुमर्हसि ।
तदैव सुप्रसन्नाहं तां तां दास्यामि ते प्रिये ॥90॥
स्वेच्छास्वरूपां मां ध्यात्वा सद्यः काममवाप्स्यसि ।
दिव्याभरणसंपूर्णां दिव्यसिंहासनस्थिताम् ॥91॥
आनन्दमग्नमनसां सर्वैश्वर्यसमन्विताम् ।
शुद्धिद्रव्य-समास्वाद-मदान्दोलित-लोचनाम् ॥92॥
विद्रवच्चन्द्रकलिकां नादनादान्त-नायिकाम् ।
दिव्यवस्त्रान्तद्योत-गूढावयव-मोहिनीम् ॥93॥
कामराज-महातन्त्रसार-चिन्तन-तत्पराम् ।
कण्ठाभरोन्मिषद्योनिस्रवद्बिन्दु-परम्पराम् ॥94॥
बिन्दुसिक्त-द्रढोच्छून-दीर्घ-कन्दर्प-वल्लरीम् ।
नटद्वलित्रयीहर्ष-रोमरेखाङ्कितोदरीम् ॥95॥
जृम्भमाण-स्तनोन्नम्रां संदष्टाधर-पल्लवाम् ।
शान्तदव्यक्त-हूंकारशतोद्भासित-सीत्कृतिम् ॥96॥
पर्यङ्कविलसत्केशां शिवलिङ्ग-महोत्सवाम् ।
कामराज-लताकृष्ट-शिवोष्ठपुट-कामिनीम् ॥97॥
निगूढ-गुणसम्पन्नां शंभुवामाङ्क-संस्थिताम् ।

अधस्थित-शिव-स्कन्धपादाग्र-न्यास-दक्षिणाम् ॥98॥
शिवार्पित-नखक्रीडासदोन्नत-नितम्बिनीम् ।
वामहस्त-गृहीताग्र-जडाजूड-प्रियंवदाम् ॥99॥
दक्षहस्त-नखक्रीडा-वशीभूतेश-कन्धराम् ।
उच्छालसोन्षन्नाद-विशेष-श्रवणोन्मदाम् ॥100॥
परिचुम्बन-कालोद्यद्बिन्दुशुद्ध-शिवाननाम् ।
बिन्दुलेहनमत्तेश-सादरालीढ-लिङ्गिनीम् ॥101॥
अन्यत्र बिन्दुपतन-तत्क्षणोद्विग्न-वत्सलाम् ।
ईशप्रार्थनयत्नाम्बु-करणोचितनैपुणाम् ॥102॥
चिरं नवनवक्रीडां शिवकामेश-चेष्टिताम् ।
आत्माम्बुसेक-निर्धूत शिवश्रम-विनाशिनीम् ॥103॥
अक्षय्यमन्त्र-संपूर्ण-सुधासेवन-तुन्दिलाम् ।
सदाशिव-महालिङ्ग-लालनात्यन्त-वैभवाम् ॥104॥
तल्लिङ्ग-घर्षणोदञ्चद्बिन्दु-सन्दोह-नन्दिताम् ।
तल्लिङ्गारोहण-व्यग्रां स्वेच्छादि-गुणविभ्रमाम् ॥105॥
आज्ञाविनिसृतानन्द-बिन्दूद्यद्योनि-मार्दवाम् ।
शिव-वक्षःस्थलाश्लेष-लुब्धां तदधरार्थिनीम् ॥106॥
मञ्जीर-मेखलानाद-संमोहित-सदाशिवाम् ।
अखण्डात्मानुसन्धान-प्रचण्डानन्द-ताण्डवम् ॥107॥
प्रेरीकृत-शिवाकारां स्वेच्छा-धीनाखिलक्रियाम् ।

शिवचैतन्यनादाढ्यां जगज्जीवन-लालसाम् ॥108॥

ध्यायेत्वेदं तु जगत्स्तोत्रं नामाष्टशतमद्भुतम् ।

मामेवैष्याति मन्नाथ सर्वाभीष्टार्थ-सिद्धिदम् ॥109॥

इदानीं मामुपास्ते हि हिमवान् पुण्यभूधरः ।

सहानुकूलया पत्न्या तद्भविष्यामि तत्सुता ॥110॥

मन्नाम स्मरणात्-सिद्धिमवाप्स्यसि यथा पुरा ।

बहुजन्मार्जितैः पुण्यैर्धूतपाप-कुलाशयः ॥111॥

धर्मसंस्थापन-व्यग्रो जगत्पालन-तत्परः ।

दुर्जनोच्चाटनाकाङ्क्षी सज्जनावनकामुकः ॥112॥

यो भविष्यति मन्नाथ सत्यसन्धो जितेन्द्रियः ।

तस्मै प्रियमिदं स्तोत्रं भक्ताय चिरजीविने ॥113॥

मन्त्रतन्त्रविदो लोके बहवः सन्ति शङ्कर ।

त्वां विनान्यं न पश्यामि स्तोत्रेऽस्मिन्नधिकारिणम् ॥114॥

तस्मात्-परीक्ष्य बहुधा स्तोत्रं बोध्यं विवेकिने ।

मन्मन्त्रमिश्र-मन्त्राद्यान्-ध्यात्वा मद्रूपदेवताः ॥115॥

आश्चर्यनामपरमाः सद्यः काममवाप्नुयुः ।

दुःसङ्गो दोषनिर्मुक्तो रहस्येत-ज्जपेत्सुधीः ॥116॥

वंशजां वैश्यजां वाऽपि पुष्पिणीं गर्भिणीन्तु वा ।

तरुणीं कन्यकां वाऽपि शुभलीलां सुमङ्गलीम् ॥117॥

अलाभे कालधर्मोढां वर्णजां वाप्यवर्णजाम् ।

गम्यां वा यदि वाऽगम्यां पुजनार्थं निमन्त्रयेत् ॥118॥
आवाह्य तद्वराङ्गे मामेभिर्नामभिरर्चयेत् ।
अगम्यां योगिनीं दद्यात्स्वयं गम्यां तु नार्चयेत् ॥119॥
तदिच्छाकारणं तत्र स्वेच्छां नाऽत्र प्रकाशयेत् ।
मातरं भगिनीं पुत्रीं स्नुषां गुरुवल्लभाम् ॥120॥
राजपत्नीं व्रतधरां रोगार्तां विधवामपि ।
विवस्त्रां नैव कुर्वीत पादयोरेव पूजयेत् ॥121॥
तासामनन्यस्वजुषा स्वेच्छया सर्वमाचरेत् ।
पूजयित्वा जपेत्स्तोत्रं यावद्बिन्दूदयावधि ॥122॥
एवं यः कुरुते नित्यं विशेषदिवसेषु वा ।
तस्मै कामान् प्रदास्यामि योजयिष्यामि तं त्वयि ॥123॥
तत्पाद-स्मृतिमात्रेण सिद्धार्था इतरे जनाः ।
आश्चर्यनामाष्टशतमेवं प्रीतिर्भवेन्मम ॥124॥
स त्रिःप्रणवमान्तैर्नामोच्चार्य ततःपरम् ।
देवी श्रीपादुके द्वे तु पूजयामीति पूजयेत् ॥125॥
तर्पयेत् तर्पयामीति देव्यैः स्वाहेति होमकृत् ।
नमस्कारे जपे चैव नमोऽन्तं परिकल्पयेत् ॥126॥

॥ इति श्रीगर्भकुलार्णवे रहस्यजीवतन्त्रे पार्वतीश्वरसंवादे
श्रीदेवीदिव्यवैभवाश्चर्याष्टोत्तरशतनामस्तोत्र कथनं नाम द्वितीयोऽध्यायः ॥

## ॥ श्री देवी दिव्यवैभवाश्चर्याष्टोत्तरशत नामावलिः ॥

ॐ परमानन्दलहर्यै नमः ।

ॐ परचैतन्यदीपिकायै नमः ।

ॐ स्वयंप्रकाशकिरणायै नमः ।

ॐ नित्यवैभवशालिन्यै नमः ।

ॐ विशुद्ध-केवलाखण्ड-सत्यकालात्मरूपिण्यै नमः ।

ॐ आदिमध्यान्तरहितायै नमः ।

ॐ महामायाविलासिन्यै नमः ।

ॐ गुणत्रयपरिच्छेत्र्यै नमः ।

ॐ सर्वतत्त्वप्रकाशिन्यै नमः ।

ॐ स्त्रीपुंसभावरसिकायै नमः । (10)

ॐ जगत्सर्गादिलंपटायै नमः ।

ॐ अशेष-नामरूपादि-भेदच्छेद-रविप्रभायै नमः ।

ॐ अनादिवासनारूपायै नमः ।

ॐ वासनोद्यत्प्रपञ्चिकायै नमः ।

ॐ प्रपञ्चोपशमप्रौढायै नमः ।

ॐ चराचरजगन्मय्यै नमः ।

ॐ समस्तजगदाधारायै नमः ।

ॐ सर्वसञ्जीवनोत्सुकायै नमः ।

ॐ भक्तचेतोमयानन्त-स्वार्थवैभव-विभ्रमायै नमः ।

ॐ सर्वाकर्षण-वश्यादि-सर्वकर्म-दुरन्धरायै नमः । (20)

ॐ विज्ञान-परमानन्दविद्यायै नमः ।

ॐ सन्तानसिद्धिदायै नमः ।

ॐ आयुरारोग्य-सौभाग्य-बल-श्रीकीर्तिभाग्यदायै नमः ।

ॐ धन-धान्य-मणी-वस्त्र-भूषालेपन-माल्यदायै नमः ।

ॐ गृह-ग्राम-महाराज्य-साम्राज्य-सुखदायिन्यै नमः ।

ॐ सप्ताङ्गशक्ति-सम्पूर्ण-सार्वभौम-फलप्रदायै नमः ।

ॐ ब्रह्म-विष्णु-शिवेन्द्रादि-पदविश्राणनक्षमायै नमः ।

ॐ भुक्ति-मुक्ति-महाभक्ति-विरक्त्य-द्वैतदायिन्यै नमः ।

ॐ निग्रहानुग्रहाध्यक्षायै नमः ।

ॐ ज्ञाननिर्द्वैतदायिन्यै नमः । (30)

ॐ परकायप्रवेशादि-योगसिद्धि-प्रदायिन्यै नमः ।

ॐ शिष्टसञ्जीवनप्रौढायै नमः ।

ॐ दुष्टसंहार-सिद्धिदायै नमः ।

ॐ लीला-विनिर्मितानेककोटि-ब्रह्माण्ड-मण्डलायै नमः ।

ॐ एकस्मै नमः ।

ॐ अनेकात्मिकायै नमः ।

ॐ नानारूपिण्यै नमः ।

ॐ अर्धाङ्गनेश्वर्यै नमः ।

ॐ शिवशक्तिमय्यै नमः ।

ॐ नित्यशृङ्गारैक-रसप्रियायै नमः । (40)

ॐ तुष्टायै नमः ।

ॐ पुष्टायै नमः ।

ॐ अपरिच्छिन्नायै नमः ।

ॐ नित्ययौवन-मोहिन्यै नमः ।

ॐ समस्तदेवतारूपायै नमः ।

ॐ सर्वदेवाधिदेवतायै नमः ।

ॐ देवर्षि-पितृ-सिद्धादि-योगिनी-भैरवात्मिकायै नमः ।

ॐ निधि-सिद्धि-मणी-मुद्रायै नमः ।

ॐ शस्त्रास्त्रायुध-भासुरायै नमः ।

ॐ छत्र-चामरवादित्र पताका-व्यजनाञ्चितायै नमः । (50)

ॐ हस्ताश्वरथ-पादातामात्यसेना-सुसेवितायै नमः ।

ॐ पुरोहित-कुलाचार्य-गुरुशिष्यादि-सेवितायै नमः ।

ॐ सुधा-समुद्र-मध्योद्यत्सुरद्रुम-निवासिन्यै नमः ।

ॐ मणिद्वीपान्तर-प्रोद्यत्कदंबवन-वासिन्यै नमः ।

ॐ चिन्तामणि-गृहान्तस्थायै नमः ।

ॐ मणिमण्डप-मध्यगायै नमः ।

ॐ रत्नसिंहासन-प्रोद्यच्छिवमञ्चाधि-शायिन्यै नमः ।

ॐ सदाशिव-महालिङ्ग-मूलसङ्घट्ट-योनिकायै नमः ।

ॐ अन्योन्यालिङ्ग-सङ्घर्ष-कण्डूसंक्षुब्ध-मानसायै नमः ।

ॐ कलोद्यद्बिन्दुकालिन्या-तुर्यनाद-परंपरायै नमः । (60)

ॐ नादान्तानन्द-सन्दोह-स्वयंव्यक्त-वचोऽमृतायै नमः ।

ॐ कामराज-महातन्त्र-रहस्याचार-दक्षिणायै नमः ।

ॐ मकार-पञ्चकोद्भूत-प्रौढा-सोल्लास-सुन्दर्यै नमः ।

ॐ श्रीचक्रराजनिलयायै नमः ।

ॐ श्रीविद्यामन्त्रविग्रहायै नमः ।

ॐ अखण्ड-सच्चिदानन्द-शिवशक्तैक-रूपिण्यै नमः ।

ॐ त्रिपुरायै नमः ।

ॐ त्रिपुरेशान्यै नमः ।

ॐ महात्रिपुरसुन्दर्यै नमः ।

ॐ त्रिपुरावास-रसिकायै नमः । (70)

ॐ त्रिपुराश्री-स्वरूपिण्यै नमः ।

ॐ महापद्मवनान्तस्थायै नमः ।

ॐ श्रीमत्त्रिपुरमालिन्यै नमः ।

ॐ महात्रिपुरसिद्धाम्बायै नमः ।

ॐ श्रीमहात्रिपुराम्बिकायै नमः ।

ॐ नवचक्रक्रमादेव्यै नमः ।

ॐ महात्रिपुरभैरव्यै नमः ।

ॐ श्रीमात्रे नमः ।

ॐ ललितायै नमः ।

ॐ बालायै नमः । (80)

ॐ राजराजेश्वर्यै नमः ।

ॐ शिवायै नमः ।

ॐ उत्पत्ति-स्थिति-संहारक्रम-चक्रनिवासिन्यै नमः ।

ॐ अर्धमेर्वात्म-चक्रस्थायै नमः ।

ॐ सर्वलोकमहेश्वर्यै नमः ।

ॐ वल्मीकपुर-मध्यस्थायै नमः ।

ॐ जम्बूवननिवासिन्यै नमः ।

ॐ अरुणाचल-शृङ्गस्थायै नमः ।

ॐ व्याघ्रालय-निवासिन्यै नमः ।

ॐ श्रीकालहस्ति-निलयायै नमः । (90)

ॐ काशीपुर-निवासिन्यै नमः ।

ॐ श्रीमत्कैलास-निलयायै नमः ।

ॐ द्वादशान्त-महेश्वर्यै नमः ।

ॐ श्रीषोडशान्त-मध्यस्थायै नमः ।

ॐ सर्ववेदान्तलक्षितायै नमः ।

ॐ श्रुति-स्मृति-पुराणेतिहासागम-कलेश्वर्यै नमः ।

ॐ भूत-भौतिक-तन्मात्र-देवताप्राण-हृन्मय्यै नमः ।

ॐ जीवेश्वर-ब्रह्मरूपायै नमः ।

ॐ श्रीगुणाढ्यायै नमः ।

ॐ गुणात्मिकायै नमः । (100)

ॐ अवस्थात्रय-निर्मुक्तायै नमः ।

ॐ वाग्रमोमा-महीमय्यै नमः ।

ॐ गायत्री-भुवनेशानी-दुर्गा-काळ्यादि-रूपिण्यै नमः ।

ॐ मत्स्य-कूर्म-वराहादि-नानारूप-विलासिन्यै नमः ।

ॐ महायोगीश्वराराध्यायै नमः ।

ॐ महावीर-वरप्रदायै नमः ।

ॐ सिद्धेश्वर-कुलाराध्यायै नमः ।

ॐ श्रीमच्चरणवैभवायै नमः । (108)

॥ इति श्री देवीदिव्यवैभवाश्चर्याष्टोत्तरशत नामावलिः संपूर्णम् ॥

पूर्ण आनन्द लहरि

எண்ணா யிரத்தாண்டு யோகம் இருக்கினும்
கண்ணார் அமுதினைக் கண்டறி வாரில்லை
உண்ணாடிக் குள்ளே ஒளியுற நோக்கினால்
கண்ணாடி போலக் கலந்துநின் றானே
- திருமந்திரம் 603



**Eight thousand years of yogA dear**
**Might not take you to Her near**
**Light you seek within you clear**
**Right like mirror you merge full gear**